# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ३५

अपृच्छत ततो रामो दक्षिणाशालयं मुनिम् ।
प्राञ्जलिर्विनयोपेत इदमाह वचोऽर्थवत् ॥ १॥

अतुलं बलमेताभ्यां वालिनो रावणस्य च ।
न त्वेतौ हनुमद्वीर्यैः समाविति मतिर्मम ॥ २॥

शौर्यं दाक्ष्यं बलं धैर्यं प्राज्ञता नयसाधनम् ।
विक्रमश्च प्रभावश्च हनूमति कृतालयाः ॥ ३॥

दृष्टवोदधिं विषीदन्तीं तदैष कपिवाहिनीम् ।
समाश्वास्य कपीन्भूयो योजनानां शतं प्लुतः ॥ ४॥

धर्षयित्वा पुरीं लङ्कां रावणान्तःपुरं तथा ।
दृष्टवा सम्भाषिता चापि सीता विश्वासिता तथा ॥ ५॥

सेनाग्रगा मन्त्रिसुताः किङ्करा रावणात्मजः ।
एते हनुमता तत्र एकेन विनिपातिताः ॥ ६॥

भूयो बन्धाद्विमुक्तेन सम्भाषित्वा दशाननम् ।
लङ्का भस्मीकृता तेन पावकेनेव मेदिनी ॥ ७॥

न कालस्य न शक्रस्य न विष्णोर्वित्तपस्य च ।
कर्माणि तानि श्रूयन्ते यानि युद्धे हनूमतः ॥ ८॥

एतस्य बाहुवीर्येण लङ्का सीता च लक्ष्मणः ।
प्राप्तो मया जयश्चैव राज्यं मित्राणि बान्धवाः ॥ ९॥

हनूमान्यदि मे न स्याद्वानराधिपतेः सखा ।
प्रवृत्तमपि को वेत्तुं जानक्याः शक्तिमान्भवेत् ॥ १०॥

किमर्थं वाली चैतेन सुग्रीवप्रियकाम्यया ।
तदा वैरे समुत्पन्ने न दग्धो वीरुधो यथा ॥ ११॥

न हि वेदितवान्मन्ये हनूमानात्मनो बलम् ।
यद्दृष्टवाञ्जीवितेष्टं क्लिश्यन्तं वानराधिपम् ॥ १२॥

एतन्मे भगवन्सर्वं हनूमति महामुने ।
विस्तरेण यथातत्त्वं कथयामरपूजित ॥ १३॥

राघवस्य वचः श्रुत्वा हेतुयुक्तमृषिस्ततः ।
हनूमतः समक्षं तमिदं वचनमब्रवीत् ॥ १४॥

सत्यमेतद्रघुश्रेष्ठ यद्ब्रवीषि हनूमतः ।
न बले विद्यते तुल्यो न गतौ न मतौ परः ॥ १५॥

अमोघशापैः शापस्तु दत्तोऽस्य ऋषिभिः पुरा ।
न वेदिता बलं येन बली सन्नरिमर्दनः ॥ १६॥

बाल्येऽप्येतेन यत्कर्म कृतं राम महाबल ।
तन्न वर्णयितुं शक्यमतिबालतयास्य ते ॥ १७॥

यदि वास्ति त्वभिप्रायस्तच्छ्रोतुं तव राघव ।
समाधाय मतिं राम निशामय वदाम्यहम् ॥ १८॥

सूर्यदत्तवरस्वर्णः सुमेरुर्नाम पर्वतः ।
यत्र राज्यं प्रशास्त्यस्य केषरी नाम वै पिता ॥ १९॥

तस्य भार्या बभूवेष्टा ह्यञ्जनेति परिश्रुता ।
जनयामास तस्यां वै वायुरात्मजमुत्तमम् ॥ २०॥

शालिशूकसमाभासं प्रासूतेमं तदाञ्जना ।
फलान्याहर्तुकामा वै निष्क्रान्ता गहने चरा ॥ २१॥

एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः ।
रुरोद शिशुरत्यर्थं शिशुः शरभराड् इव ॥ २२॥

ततोद्यन्तं विवस्वन्तं जपा पुष्पोत्करोपमम् ।
ददृशे फललोभाच्च उत्पपात रविं प्रति ॥ २३॥

बालार्काभिमुखो बालो बालार्क इव मूर्तिमान् ।
ग्रहीतुकामो बालार्कं प्लवतेऽम्बरमध्यगः ॥ २४॥

एतस्मिन्प्लवनाने तु शिशुभावे हनूमति ।
देवदानवसिद्धानां विस्मयः सुमहानभूत् ॥ २५॥

नाप्येवं वेगवान्वायुर्गरुडो न मनस्तथा ।

यथायं वायुपुत्रस्तु क्रमतेऽम्बरमुत्तमम् ॥ २६॥

यदि तावच्छिशोरस्य ईदृशौ गतिविक्रमौ ।
यौवनं बलमासाद्य कथं वेगो भविष्यति ॥ २७॥

तमनुप्लवते वायुः प्लवन्तं पुत्रमात्मनः ।
सूर्यदाहभयाद्रक्षंस्तुषारचयशीतलः ॥ २८॥

बहुयोजनसाहस्रं क्रमत्येष ततोऽम्बरम् ।
पितुर्बलाच्च बाल्याच्च भास्कराभ्याशमागतः ॥ २९॥

शिशुरेष त्वदोषज्ञ इति मत्वा दिवाकरः ।
कार्यं चात्र समायत्तमित्येवं न ददाह सः ॥ ३०॥

यमेव दिवसं ह्येष ग्रहीतुं भास्करं प्लुतः ।
तमेव दिवसं राहुर्जिघृक्षति दिवाकरम् ॥ ३१॥

अनेन च परामृष्टो राम सूर्यरथोपति ।
अपक्रान्तस्ततस्त्रस्तो राहुश्चन्द्रार्कमर्दनः ॥ ३२॥

स इन्द्रभवनं गत्वा सरोषः सिंहिकासुतः ।
अब्रवीद्भ्रुकुटीं कृत्वा देवं देवगणैर्वृतम् ॥ ३३॥

बुभुक्षापनयं दत्त्वा चन्द्रार्कौ मम वासव ।
किमिदं तत्त्वया दत्तमन्यस्य बलवृत्रहन् ॥ ३४॥

अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः ।
अथान्यो राहुरासाद्य जग्राह सहसा रविम् ॥ ३५॥

स राहोर्वचनं श्रुत्वा वासवः सम्भ्रमान्वितः ।
उत्पपातासनं हित्वा उद्वहन्काञ्चनस्रजम् ॥ ३६॥

ततः कैलासकूटाभं चतुर्दन्तं मदस्रवम् ।
शृङ्गारकारिणं प्रांशुं स्वर्णघण्टाट्टहासिनम् ॥ ३७॥

इन्द्रः करीन्द्रमारुह्य राहुं कृत्वा पुरःसरम् ।
प्रायाद्यत्राभवत्सूर्यः सहानेन हनूमता ॥ ३८॥

अथातिरभसेनागाद्राहुरुत्सृज्य वासवम् ।
अनेन च स वै दृष्ट आधावञ्शैलकूटवत् ॥ ३९॥

ततः सूर्यं समुत्सृज्य राहुमेवमवेक्ष्य च ।
उत्पपात पुनर्व्योम ग्रहीतुं सिंहिका सुतम् ॥ ४०॥

उत्सृज्यार्कमिमं राम आधावन्तं प्लवङ्गमम् ।
दृष्ट्वा राहुः परावृत्य मुखशेषः पराङ्मुखः ॥ ४१॥

इन्द्रमाशंसमानस्तु त्रातारं सिंहिकासुतः ।
इन्द्र इन्द्रेति सन्त्रासान्मुहुर्मुहुरभाषत ॥ ४२॥

राहोर्विक्रोशमानस्य प्रागेवालक्षितः स्वरः ।
श्रुत्वेन्द्रोवाच मां भैषीरयमेनं निहन्म्यहम् ॥ ४३॥

ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि ।
फलं तं हस्तिराजानमभिदुद्राव मारुतिः ॥ ४४॥

तदास्य धावतो रूपमैरावतजिघृक्षया ।
मुहूर्तमभवद्घोरमिन्द्राग्न्योरिव भास्वरम् ॥ ४५॥

एवमाधावमानं तु नातिक्रुद्धः शचीपतिः ।
हस्तान्तेनातिमुक्तेन कुलिशेनाभ्यताडयत् ॥ ४६॥

ततो गिरौ पपातैष इन्द्रवज्राभिताडितः ।
पतमानस्य चैतस्य वामो हनुरभज्यत ॥ ४७॥

तस्मिंस्तु पतिते बाले वज्रताडनविह्वले ।
चुक्रोधेन्द्राय पवनः प्रजानामशिवाय च ॥ ४८॥

विण्मूत्राशयमावृत्य प्रजास्वन्तर्गतः प्रभुः ।
रुरोध सर्वभूतानि यथा वर्षाणि वासवः ॥ ४९॥

वायुप्रकोपाद्भूतानि निरुच्छ्वासानि सर्वतः ।
सन्धिभिर्भज्यमानानि काष्ठभूतानि जज्ञिरे ॥ ५०॥

निःस्वधं निर्वषट्कारं निष्क्रियं धर्मवर्जितम् ।
वायुप्रकोपात्त्रैलोक्यं निरयस्थमिवाबभौ ॥ ५१॥

ततः प्रजाः सगन्धर्वाः सदेवासुरमानुषाः ।
प्रजापतिं समाधावन्नसुखार्ताः सुखैषिणः ॥ ५२॥

ऊचुः प्राञ्जलयो देवा दरोदरनिभोदराः ।
त्वया स्म भगवन्सृष्टाः प्रजानाथ चतुर्विधाः ॥ ५३॥

त्वया दत्तोऽयमस्माकमायुषः पवनः पतिः ।
सोऽस्मान्प्राणेश्वरो भूत्वा कस्मादेषोऽद्य सत्तम ॥ ५४॥

रुरोध दुःखं जनयन्नन्तःपुर इव स्त्रियः ।
तस्मात्त्वां शरणं प्राप्ता वायुनोपहता विभो ॥ ५५॥

वायुसंरोधजं दुःखमिदं नो नुद शत्रुहन् ॥ ५६॥

एतत्प्रजानां श्रुत्वा तु प्रजानाथः प्रजापतिः ।
कारणादिति तानुक्त्वा प्रजाः पुनरभाषत ॥ ५७॥

यस्मिन्वः कारणे वायुश् चुक्रोध च रुरोध च ।
प्रजाः शृणुध्वं तत्सर्वं श्रोतव्यं चात्मनः क्षमम् ॥ ५८॥

पुत्रस्तस्यामरेशेन इन्द्रेणाद्य निपातितः ।
राहोर्वचनमाज्ञाय राज्ञा वः कोपितोऽनिलः ॥ ५९॥

अशरीरः शरीरेषु वायुश्चरति पालयन् ।
शरीरं हि विना वायुं समतां याति रेणुभिः ॥ ६०॥

वायुः प्राणाः सुखं वायुर्वायुः सर्वमिदं जगत् ।
वायुना सम्परित्यक्तं न सुखं विन्दते जगत् ॥ ६१॥

अद्यैव च परित्यक्तं वायुना जगदायुषा ।
अद्यैवेमे निरुच्छ्वासाः काष्ठकुड्योपमाः स्थिताः ॥ ६२॥

तद्यामस्तत्र यत्रास्ते मारुतो रुक्प्रदो हि वः ।
मा विनाशं गमिष्याम अप्रसाद्यादितेः सुतम् ॥ ६३॥

ततः प्रजाभिः सहितः प्रजापतिः
सदेवगन्धर्वभुजङ्गगुह्यकः ।
जगाम तत्रास्यति यत्र मारुतः
सुतं सुरेन्द्राभिहतं प्रगृह्य सः ॥ ६४॥

ततोऽर्कवैश्वानरकाञ्चनप्रभं
सुतं तदोत्सङ्गगतं सदा गतेः ।
चतुर्मुखो वीक्ष्य कृपामथाकरोत्
सदेवसिद्धर्षिभुजङ्गराक्षसः ॥ ६५॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com